**MEDHĀMANTHAN** ISSN : 3139-7840

A premier peer-reviewed, open-access, bimonthly online research journal
dedicated to the fields of Arts, Humanities, and Social Sciences
Volume: 1, Issue: 1 (MAY - JUN) 2026

# A Discussion on Tiṅ-arthas in the Sense of Kartṛ Based on Sāramañjarī
# सारमञ्जरीदिशा कत्रर्थे विहितानां तिङर्थानां विवेचनम्

***Dr. Bishnupada Pal***

*Assistant Professor, Dept. of Sanskrit, Pali & Prakrit, Visva-Bharati University, PO, Santiniketan, Bolpur, West Bengal 731235, India.*
*E-mail ID: bishnupada.pal@visva-bharati.ac.in*
*Page No: 21-27*

***Abstract:*** *The core debate among the Nyāya, Mīmāṃsā, and Vyākaraṇa schools centers on the locus of the denotative power (śakti) of verbal suffixes (ākhyāta / tiṅ). In the text Sāramañjarī, ākhyāta is classified into three types based on agent (kartṛ), object (karma), and action (bhāva). This paper specifically analyzes tiṅ suffixes prescribed in the sense of an agent (kartṛ-vihita). While Grammarians (Vaiyākaraṇas) argue that the śakti lies in the agent (kartā), Logicians (Naiyāyikas) claim it resides in volition (kṛti). Grammarians object that the Nyāya view causes contradictions with Pāṇinian tradition, dismantles grammatical persons (puruṣa), and disrupts the abhihitānabhihita system. However, in Sāramañjarī, Jayakṛṣṇa Śarmā systematically resolves these objections using Nyāya principles like bhāva-pradhāna-nirdeśa and contextual agreement. Ultimately, each school deems its own system supreme. This article serves as a valuable resource for students studying these profound grammatical disputes.*

**Keywords:** *Jayakṛṣṇaśarmā, Sāramañjarī, Ākhyātārthaḥ, Tiṅ, Kṛtiḥ, Kartṛvihitaḥ.*

विद्वत्प्रवरः तर्कचूडामणिः जयकृष्णशर्मा स्वकीये सारमञ्जर्याख्ये ग्रन्थे लकारार्थम्, आख्यातार्थं, कारकं, समासं च प्रतिपादयामास। सम्प्रति आख्यातार्थस्य विचारः क्रियते। आख्यातार्थः कः इति विवेचनात् पूर्वं किं नाम आख्यातमिति मनसि प्रश्नः समुदेति। यतो हि तत्र तत्र शास्त्रेषु आख्यातशब्दस्य बहुविधः अर्थः विलसति। तथाहि— "आख्यातमाख्यातेन क्रियासातत्ये"[1] इति वार्तिके आख्यातशब्देन तिङन्तस्य ग्रहणं विद्यते। अत एव वार्तिकार्थः भवति— 'तिङन्तं तिङन्तेन सह समस्यते क्रियासातत्ये गम्यमाने' इति। तेन खादतमोदता पचतभृज्जता इत्यादीनामुदाहरणानां सिद्धिर्भवति। क्वचिच्च 'क्रियाप्रधानमाख्यातम्' इत्यादौ यास्कवचने आख्यातशब्देन धातोर्ग्रहणं भवति। अत एव नागेशेनोक्तं तस्य लघुमञ्जूषायाम्– "तत्र ह्याख्यातशब्देनाख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेति व्युत्पत्त्या धातुरूपमुच्यते"[2] इति। क्वचिच्च आख्यातेन तिङ्प्रत्ययानां ग्रहणं भवति। तथाहि प्राह जगदीशः शब्दशक्तिप्रकाशिकायाम्—

"धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने।
समर्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते।"इति

अत एव आदौ प्रोक्तम् "तिङाख्यातयोः पर्यायत्वात्"[3] इति। एवञ्च आख्यातपदेन क्वचित् तिङन्तस्य, क्वचित् धातोः, क्वचित् तिङ्-प्रत्ययस्य ग्रहणं वर्तते, एवं सति अत्र आख्यातम् नाम किमिति चेत् प्रकृते आख्यातपदेन तिङ्-प्रत्ययस्यैव ग्रहणम्।

**सारमञ्जरीकारमतम्—**

श्रीजयकृष्णशर्मणः मतानुसारेण लकारस्थानीयतिङ् एव आख्यातपदवाच्यः। लट्लोडादिदशविधलकाराणां स्थाने तिङ्-प्रत्ययाः जायन्ते। एवञ्च तिप्-तस्-झि इत्यादिप्रत्ययाः आख्यातपदवाच्याः। तथाहि ग्रन्थकृत्स्वकीयग्रन्थे प्राह— "अथ लकारस्थानीयतिङाम् आख्यातपदवाच्यत्वम्"[4] इति। आख्यातत्वञ्च धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोध-समर्थशब्दत्वम्। तथा चाख्यातसामान्यस्य यत्नापरनामकृतौ शक्तिः। कृतौ च अनुकूलत्वसम्बन्धेन धात्वर्थस्य विशेषणतया धात्वर्थावच्छिन्नयत्नो बोध्यते। शाब्दबोधे तादृशस्य यत्नस्य विधेयतया भानात्। तादृशयत्नविधेयताकान्वयबोधसमर्थः शब्दः तिङ्-प्रत्ययादिभिर्बोध्यः। यथा— 'चैत्रः पचति'-इति पच्धात्वर्थः विक्लित्तिरूपं फलम्, तदनुकूलाग्निप्रज्वलनादिव्यापारश्च, तिङर्थः कृतिः, तत्र फलं व्यापारे अनुकूलत्वसम्बन्धेन विशेषणम्, व्यापारश्च कृतौ अनुकूलत्वसम्बन्धेन विशेषणम्, कृतिश्च प्रथमान्तार्थे चैत्रे आश्रयत्वसम्बन्धेन विशेषणम्, तथा चोक्तवाक्यात् विक्लित्त्यनुकूलपादविक्षेपादिव्यापारानुकूलकृतिमान् चैत्रः इति बोधो जायते, अत्र

धात्वर्थः पादविक्षेपादिव्यापारः, तेन अवच्छिन्ना तिबर्थः कृतिः, तद्विधेयताकोऽयं बोधो वर्तते, तथा च पच्धात्वर्थपादविक्षेपादिव्यापारावच्छिन्नतिङर्थयत्नविधेयताकशाब्दबोधं प्रति समर्थः शब्दः ति तं विना यत्नविषयकशाब्दबोधस्यासम्भवात्, अतस्तदेव आख्यातम् इत्युच्यते। स तिङ् आख्यातपदवाच्यः। स च आख्यातः त्रिविधः। तथाहि— क) कर्तृविहितः, ख) कर्मविहितः, ग) भावविहितश्च। कर्तृविहिततिङ् इत्युक्ते कर्तरि अर्थे विहितः तिङ्-प्रत्ययः। एवञ्च कर्मविहिततिङ् इत्युक्ते कर्मणि अर्थे विहितः तिङ्-प्रत्ययः। भावविहिततिङ् इत्युक्ते भावार्थे विहितः तिङ्-प्रत्ययः। अस्मिन् शोधपत्रे ग्रन्थकलेवरवृद्धिभयात् केवलं कर्त्रर्थे विहितानां तिङाम् अर्थविवेचनं विधास्यते।

**कर्तृविहिततिङर्थविमर्शः—**

तत्र जयकृष्णेन कर्तृविहिततिङ्प्रत्ययानां कृतौ वर्तमानादिकाले एकत्वादिसंख्यायाञ्च शक्तिः स्वीक्रियते। एवञ्च कर्तृविहितस्याख्यातप्रत्ययस्य शक्तिः कृत्यादिषु वर्तते इत्यत्र किं मानम्, इति चेदुच्यते— कर्तृविहितस्य आख्यातस्य वर्तमानादिकाले शक्तिः इत्यत्र 'वर्तमाने लट्', 'परोक्षे लिट्', 'अनद्यतने लङ्' इत्यादीनि पाणिनिसूत्राणि प्रमाणभूतानि। एवं कर्तृविहितस्याख्यातस्य एकत्वादिसंख्यायां शक्तिः इत्यत्र 'द्व्येकयोर्द्विवचनैकवचने', 'बहुषु बहुवचनम्' इति पाणिनीयसूत्रं प्रमाणम्। एवं कर्तृविहितस्याख्यातस्य कृतौ शक्तिः इत्यत्र विवरणरूपशक्तिग्राहकं प्रमाणम्। यतो हि पचति इत्यस्य पाकं करोति इति विवरणम्। पच्-धातोः पाकः इति विवरणम्। तिप्रत्ययस्य करोति इति विवरणम्। कृ-धातोश्च जयकृष्णनये कृतिरित्यर्थः। तेन विवरणरूपशक्तिग्रहबलात् ज्ञायते यत् तिबादिप्रत्ययस्य कृतौ शक्तिः। तथा चोक्तं निष्कर्षरूपेण जयकृष्णेन "अथ कर्तृविहिताख्यातस्य कृतौ वर्तमानत्वादौ एकत्वादौ च शक्तिः सिद्धा"[5] इति। वर्तमानादीत्यत्र आदिपदेन भूतभविष्यतोः ग्रहणम्। कृतिः नाम का। कृतेः अपरं नाम प्रयत्नः, यत्नः इत्यादिकम्। तत्स्वरूपं च प्रयत्नत्वसामान्यवान् प्रयत्नः। अथवा कार्यमात्रकारणतावच्छेदकत्वं कृतित्वम्। अथवा आख्यातपदशक्यतावच्छेदकधर्मवत्त्वं कृतित्वम्। एकत्वादिकमित्यत्र आदिपदेन द्वित्वबहुत्वयोः ग्रहणम्। एकत्वादिकन्तु अत्यन्तं प्रसिद्धम्।

**कर्तृशक्तिनिराकरणम्—**

अथ वैयाकरणैस्तु "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा.सू.– ३/४/६९) इत्यनुशासनबलात्, चैत्रः पचति इत्यादौ तिबर्थकर्त्रा सह चैत्रादेः अभेदान्वयानुरोधाच्च पचतीत्यादौ कर्तृविहिताख्यातस्य धात्वर्थव्यापाराश्रये कर्तरि शक्तिः स्वीक्रियते। एवं सति कुतः स्मृतिसिद्धं वैयाकरणमतं परित्यज्य नवीनं मतं स्वीकृतम्, इति चेदुच्यते पूर्वोक्तवैयाकरणमतस्वीकारे सति शक्यतावच्छेदके गौरवमापद्यते। यतो हि आख्यातस्य कर्तरि शक्तिस्वीकारे शक्यः कर्ता। शक्यता कर्तृनिष्ठा। एवञ्च शक्यतावच्छेदकं कर्तृत्वम्। कर्तृत्वं नाम कृतिः। अर्थात् कर्तृनिष्ठो धर्मः कृतिरूप एव शक्यतावच्छेदकः भवति। सा च कृतिः प्रतिकर्त्तृ नानारूपतया भासते। ततश्च शक्यतावच्छेदकधर्माणामानन्त्यात् गौरवापत्तिः। आख्यातस्य कृतौ शक्तिस्वीकारे तु शक्यतावच्छेदककृतगौरवदोषो न भवति। यतो हि आख्यातस्य कृतौ शक्तिस्वीकारे शक्या कृतिः। शक्यता कृतिनिष्ठा। एवञ्च शक्यतावच्छेदकं कृतित्वम्। कृतित्वञ्च नानाकृतिषु अनुगतं जातिरूपम् एकमेव। तस्मात् जयकृष्णः गौरवग्रस्तं स्मृतिसिद्धं वैयाकरणमतं परित्यज्य लाघवात् आख्यातस्य कृतौ एव शक्तिम् स्वीकरोति। तथा चोक्तं ग्रन्थकारेण स्वग्रन्थे— "तत्र कर्तृविहिताख्यातस्य कृतावेव शक्तिः। कृतित्वरूपशक्यतावच्छेदके लाघवात्। न कर्तरि। शक्यतावच्छेदककृतेरननुगमात्।"[6] इति।

**व्यापारे शक्तिनिराकरणम्—**

अथ मीमांसकाः तिबाद्याख्यातप्रत्ययस्य व्यापारे शक्तिम् ऊरीचक्रुः। परन्तु आख्यातस्य व्यापारे शक्तिरित्यत्र किं प्रमाणमिति चेदुच्यते विवरणमेव प्रमाणम्। तथाहि तत्तत्पदानां तत्तदर्थे विवरणादपि शक्तिग्रहो भवति। यतो हि विवरणमपि शक्तिग्राहकेषु मध्ये अन्यतमम्। बीजादिनाङ्कुरः कृतः इत्यत्र अचेतनबीजादौ कृतेः अविद्यमानत्वात् कृ-धातोः व्यापारार्थकत्वं स्वीक्रियते। स च व्यापारः अचेतनबीजादिनिष्ठः। अत एव मीमांसकाः तिबाद्याख्यातप्रत्ययस्य व्यापारे शक्तिं वदन्ति। परन्तु इदमपि मतं न साधु।

MEDHĀMANTHAN ISSN : 3139-7840
A premier peer-reviewed, open-access, bimonthly online research journal
dedicated to the fields of Arts, Humanities, and Social Sciences
Volume: 1, Issue: 1 (MAY - JUN) 2026

एवं शक्यतावच्छेदककृतेरननुगमात् यथा कर्तृविहितस्याख्यातस्य कर्तरि न शक्तिः, तथैव व्यापारे अपि न शक्तिः। यतो हि कर्तृविहितस्याख्यातस्य व्यापारे शक्तिस्वीकारे शक्यः व्यापारः। स च व्यापारः ज्ञानम्, इच्छा, कृतिः, शारीरिकचेष्टा इत्यादिभेदेन बहुविधः। शक्यता ज्ञाननिष्ठा, इच्छानिष्ठा, कृतिनिष्ठा, चेष्टानिष्ठा च। शक्यतावच्छेदकं ज्ञानत्वम्, इच्छात्वम्, कृतित्वम्, चेष्टात्वम्। एवञ्च कर्तृविहितस्याख्यातस्य व्यापारे शक्तिस्वीकारे शक्यतावच्छेदकत्वं नाना भवति। कृत्यादिसकलव्यापारस्य किञ्चित् एकम् अनुगतं शक्यतावच्छेदकत्वं न विद्यते। अतः शक्यतावच्छेदकस्य आनन्त्यात् कर्तृविहितस्याख्यातस्य व्यापारे शक्तिः नैव स्वीक्रियते। तथाहि ग्रन्थकारेण प्रोक्तम्— "कृत्यादिसाधारणयावद्व्यापारानुगतैकधर्माभावात्"[7] इति।

कर्तृविहितस्याख्यातस्य व्यापारे शक्तिस्वीकारे विवरणं कारणम् इति मतमपि न साधु। यतो हि कृ-धातोः सर्वत्र व्यापारार्थो न भवति। अपि तु रथः गच्छति, बीजादिना अङ्कुरः कृतः इत्यादिविशिष्टस्थले एव व्यापारार्थकत्वं प्रतीयते। तस्मात् अविनाभावेन तिबाद्याख्यातप्रत्ययेन व्यापारार्थकस्य उपस्थित्यभावात् कर्तृविहितस्याख्यातस्य व्यापारे शक्तिः न ग्राह्या। तस्मात् कर्तृविहितस्य तिबाद्याख्यातप्रत्ययस्य कृतौ एव शक्तिः स्वीक्रियते। परन्तु अचेतनरथादिषु कृतेरविद्यमानत्वात् लक्षणावृत्तिः समाश्रियते।

अपरञ्च शक्यतावच्छेदककृतेरननुगमात् यथा कर्तृविहिताख्यातस्य कर्तरि न शक्तिः, तथैव व्यापारेऽपि कर्तृविहिताख्यातस्य न शक्तिः इति जयकृष्णराद्धान्तः। यथा गौरवात् कर्तृत्वं नाख्यातपदशक्यतावच्छेदकं तथैव जन्यत्वघटितव्यापारत्वमपि न शक्यतावच्छेदकम्। यतो हि कर्तरि विहितस्याख्यातस्य व्यापारे शक्तिस्वीकारे शक्यः व्यापारः। तत्स्वरूपञ्च "तज्जन्यत्वे सति तज्जन्यजनको व्यापारः" इति। एवं जन्यत्वलक्षणघटितव्यापारलक्षणलक्षितस्यास्य व्यापारस्य यत्नत्वजात्यपेक्षया शक्यतावच्छेदकांशे गौरवम्। तस्मात् व्यापारे शक्तिर्लकाराणामित्ययुक्तं वचो मीमांसकानाम्।

अपरञ्च आख्यातस्य व्यापारे शक्तिस्वीकारे महान् गौरवदोषः भविष्यति। यतो हि पचति, अपचत्, पक्ष्यति, पक्कवान् इत्यत्र बहुविधाः तिबाद्याख्यातप्रत्ययाः सन्ति। बहुविधाख्यातप्रत्ययानां तु एकस्मिन्नेव फूत्कारादिव्यापारे शक्तिः स्वीकार्या। तच्च गौरवाय कल्पते। तस्मात् गौरवदोषात् व्यापारेऽपि आख्यातस्य शक्तिः न ग्राह्या इति मतन्तु युक्तियुक्तम्।

**कृतौ शक्तिस्वीकारे दोषाः —**

कर्तृविहितस्याख्यातस्य कृतौ शक्तिस्वीकारे बहवः दोषाः दार्शनिकैः सम्भाविताः। ते च दोषाः—

अ) पाणिनीयविरोधापत्तिः।

आ) अभिहितानभिहितव्यवस्थोच्छेदापत्तिः।

इ) पुरुषव्यवस्थोच्छेदापत्तिः।

अधः क्रमेण एकैकशः दोषान् उत्थाप्य क्रमेण तत्तद्दोषाणां समाधानानि अपि प्रदीयन्ते।

**अ) पाणिनीयस्मृतिविरोधापत्तिः —**

जयकृष्णानुसारं कर्त्राख्यातप्रत्ययानां कृतिरर्थः इति स्वीक्रियते चेत्तदा 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति पाणिनीयस्मृतिविरोधापत्तिरूपो दोषो वर्तते। तथाहि सूत्रस्यास्यार्थस्तावत् भवति 'लकाराः सकर्मकेभ्यो धातुभ्यः कर्तरि कर्मणि च भवन्ति, अकर्मकेभ्यो धातुभ्यः कर्तरि भावे च भवन्ति', एवं च लकाराणां कर्ता कर्म भावः, इत्येते वाच्याः इति सूत्रानुसारं समायाति। जयकृष्णानुसारं तु कृतिः फलं भावः, इत्येते अर्थाः लकाराणाम्। एवञ्च पाणिनिसूत्रेण साकं विरोधः सुस्पष्ट एव।

**समाधानम्—**

यद्यपि प्रतिपादितदिशा दोषो वर्तते, किन्तु नैयायिकाः दोषस्यास्य समाधानं कुर्वन्ति। तथाहि ते वदन्ति— लः कर्मणि चेति सूत्रे कर्तृकर्मपदे भावप्रधाननिर्देशो वर्तते, एवं च कर्तृ इत्यस्य कर्तृत्वमर्थः। तच्च कर्तृत्वं नाम कृतिः। यतो हि न्यायनये कर्ता कृत्याश्रयः, तथा च कर्तृत्वं नाम कृतिः, "प्रकृत्यर्थप्रकारीभूतो धर्मो भावप्रत्ययेनोच्यते", इति नियमात्। तथा च सूत्रस्यार्थो भवति लकाराः सकर्मकेभ्यो धातुभ्यः कर्तृत्वे कर्मत्वे च भवन्ति, अकर्मकेभ्यो धातुभ्यो भावे कर्तृत्वे च भवन्ति। एवं चानेन सूत्रेणापि लकाराणां कृतिः फलमित्यादय एवार्था सन्तीति प्रतिफलति। तस्मान्नास्ति श्रुतिविरोधापत्तिरिति भावः।

**आ) अभिहितानभिहितव्यवस्थोच्छेदापत्तिः —**

आख्यातस्य कृतौ शक्तिस्वीकारे सति वैयाकरणाः दोषं प्रदर्शयामासुः। आख्यातप्रत्ययस्य कृतौ शक्तिस्वीकारे कर्त्ता तु नाख्यातवाच्यः। एवं तिङ्-प्रत्ययादिना कर्ता उक्तः भवति चेत् 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'(पा.सू.२/३/४६) इति शास्त्रेण प्रथमा विभक्तिः सम्भवति। यथा 'चैत्रः पचति' इत्यादौ तिङ्प्रत्ययेन कर्ता उक्तः। अतः चैत्रपदात् प्रथमा विभक्तिः भवति। 'चैत्रः पचति' इत्यादिस्थले तु आख्यातस्य यत्ने शक्तिस्वीकारात् तिङा कर्ता नाभिहितः। अत एव 'अनभिहिते'(पा.सू. २/३/१) इत्यधिकारसामर्थ्यात् 'कर्तृकरणयोस्तृतीया'(पा.सू.२/३/१८) इति अनुशासनबलात् चैत्रः इत्यत्र तृतीयाविभक्तिः स्यात्। तेन 'चैत्रः पचति' इति वाक्यं तु कदापि न सम्भवति। सदैव 'चैत्रः पचति' इत्यत्र 'चैत्रेण पचति' इत्येव प्रयोगः सम्भवेत्। एतादृशस्य दोषस्य वारणाय वैयाकरणाः आख्यातस्य कर्तरि शक्तिमङ्गीकुर्वन्ति। एतेन 'चैत्रः पचति' इत्यादौ तिङा कर्ता उक्तो भवति। अत एव कर्तुरभिधानात् 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति पाणिनीयशास्त्रानुशासनात् उक्ते कर्तरि प्रथमा विधीयते।

**समाधानम्—**

जयकृष्णनये वैयाकरणप्रदत्तदोषस्तु न सम्भवति। यतो हि जयकृष्णशर्मणः कर्तृगतसंख्याभिधानानभिधानाभ्यां तृतीयादिविभक्तिं व्यवस्थापितवन्तः। यदा कर्तृगता संख्या आख्यातप्रत्ययेन प्रोक्ता न भवति तदा 'अनभिहिते' इत्यधिकारबलात् 'कर्तृकरणयोस्तृतीया' इति पाणिनीयानुशासनबलात् अनभिहिते कर्तरि तृतीया विभक्तिः सम्भवति। यदा तु कर्तृगता संख्या तिङा उक्ता भवति चेत् 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति पाणिनीयानुशासनबलात् अभिहिते कर्तरि प्रथमाविभक्तिः जायते। यथा— 'चैत्रः पचति' इत्यादिस्थले लकारस्थानीयतिपा कर्तृगतैकत्वरूपसंख्या उक्ता। अत एव चैत्रः इत्यत्र 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इत्यनेन प्रथमा विभक्तिः। एवञ्च आख्यातस्य कृतौ शक्तिस्वीकारेऽपि न दोषः। तथाहि प्रोक्तम्— "न चाख्यातेन कर्तुरनभिधाने चैत्रः पचतीत्यत्र चैत्रपदोत्तरं तृतीया, लकारेणानभिधानादिति वाच्यम्। कर्तृगतसंख्याभिधानानभिधानाभ्यां तृतीयादेर्व्यवस्थापितत्वात्। एवं व्यापारेऽपि न शक्तिः।[8]" इति। पूर्वोक्तदोषनिरासाय एकः कार्यकारणभावः कल्पितो भवति। तथा हि, यत्र आख्यातेन कर्तृविशेष्यकसङ्ख्याप्रकारकान्वयबोधस्तत्र तादृशान्वयबोधजनकलकारादिसमभिव्याहृतकर्तृवाचकपदोत्तरं प्रथमा भवति। यथा— 'चैत्रः पचति' इत्यादौ लकारस्थानीयतिपा चैत्रविशेष्यकैकत्वसंख्याबोधनात् तादृशलकारसमभिव्याहृतचैत्रपदोत्तरं प्रथमा विभक्तिः स्यात्। एवं यत्राख्यातेन कर्तृविशेष्यकसंख्याप्रकारकान्वयबोधस्याजननं तत्र तादृशान्वयबोधाजनकलकारादिसमभिव्याहृत-कर्तृवाचकपदोत्तरं तृतीया भवति। यथा– 'चैत्रेण पच्यते तण्डुलः' इत्यादौ लकारस्थानीय-ते-प्रत्ययेन चैत्रविशेष्यकत्वसङ्ख्यायाः अबोधनात् परन्तु कर्मवाचकतण्डुलगतैकत्वसङ्ख्याबोधनात् तादृशलकारसमभिव्याहृतचैत्रपदोत्तरं तृतीया भवति, तत्रानुशासनं 'कर्तृकरणयोस्तृतीया' इति। एतेन आख्यातस्य यत्ने शक्तिस्वीकारेऽपि 'चैत्रः पचति' इत्यपि प्रयोगः सम्भवति।

**इ) पुरुषव्यवस्थोच्छेदापत्तिः —**

जयकृष्णनये पुरुषव्यवस्थोच्छेदापत्तिरूपोऽपि दोषो वर्तते। तथाहि 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः'(पा.सू. १/४/१०४) इत्यनेन सूत्रेण मध्यमपुरुषस्य व्यवस्था भवति। सूत्रेऽस्मिन् सामानाधिकरण्यं नाम तिङ्वाच्यकारकवाचित्वरूपम्, एवं च सूत्रस्यास्यार्थस्तावत् तिङ्वाच्यकारकवाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमपुरुषो भवतीति, यथा 'त्वं गच्छसि', 'मया त्वं दृश्यसे' इत्यादौ किन्तु जयकृष्णनये तु तिङ्वाच्यं कारकमेव नास्ति। तन्नये तु तिङः कृतिरर्थः, कृतेश्च नहि युष्मदर्थेन साकं सामानाधिकरण्यं सम्भवति, तस्मात्कथं मध्यमपुरुषस्य व्यवस्था स्यात्। एवम् 'अस्मद्युत्तमः'(पा.सू. १/४/१०७) इति सूत्रमुत्तमपुरुषस्य व्यवस्थापकम्। सूत्रस्यास्यार्थो भवति— तिङ्वाच्यकारकवाचिनि अस्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च उत्तमपुरुषो भवतीति, अत्रापि तिङ्वाच्यस्य कारकस्याभावादस्यापि सूत्रस्य प्रवृत्तिर्नैव भविष्यति तस्मात्कथं जयकृष्णनये उत्तमपुरुषस्य व्यवस्था भविष्यति। 'शेषे प्रथमः'(पा.सू.१/४/१०८) इत्यनेन प्रथमपुरुषस्य व्यवस्था भवति, अस्यापि सूत्रस्य

प्रवृत्तिः कारकवाचकत्वाभावे नैव सम्भवति, तस्मात्कथं प्रथमपुरुषस्य व्यवस्था भविष्यति। एवं च पुरुषव्यवस्थोच्छेदापत्तिरूपो दोषो वर्तते जयकृष्णनये इति भावः।

**समाधानम्—**

यद्यपि वैयाकरणैः सूत्रस्यास्यार्थो यथा प्रतिपादितो वर्तते तद्रीत्या दोषस्तु प्रतिभाति किन्तु न्यायनये सूत्रस्यार्थो भिन्नरूपेण प्रतिपादितो वर्तते। तथाहि— 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः'(पा.सू. १/४/१०५) इत्यत्र न्यायनये सामानाधिकरण्यं नाम तिङर्थान्वितार्थबोधकत्वम्, तिङर्थसंख्यान्वयिवाचकत्वं वा। एवं च सूत्रस्यास्यार्थो भवति तिङर्थान्वितार्थबोधके तिङर्थसंख्यान्वयिवाचिनि वा युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च मध्यमपुरुषो भवति। यथा 'त्वं गच्छसि' इत्यत्र तिङर्थः कृतिः, तस्यान्वयः प्रथमान्तार्थे युष्मदर्थे भवति, अतः तिङर्थकृत्यन्वितार्थः युष्मदर्थः, तद्बोधके युष्मदि उपपदे सति प्रकृतस्थले मध्यमपुरुषस्य प्रयोगो भवति। अथवा तिङर्थः अत्र एकत्वसंख्या तस्या युष्मदर्थे अन्वयो भवति, अतस्तदन्वयि युष्मदर्थः, तद्वाचिनि युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने चात्र मध्यमपुरुषस्य प्रयोगो भवति। यथा— 'त्वं गच्छसि', 'त्वं पचसि' इत्यादौ भवति एवमन्यत्रापि बोध्यम्। एवम् 'अस्मद्युत्तमः'(पा.सू. १/४/१०७)इति सूत्रस्यार्थो भवति- तिङर्थान्वितार्थबोधके तिङर्थसंख्यान्वयिवाचिनि वा अस्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च उत्तमपुरुषो भवति। 'अहं गच्छामि', 'अहं पचामि' इत्यादावपि भवति। एवमन्यत्रापि बोध्यम्।

## अत्रायं निष्कर्षः —

कर्तृविहितस्याख्यातस्य कुत्र शक्तिः विलसति इत्यस्मिन् विषये बहूनां पण्डितानां बहूनि मतानि वर्तन्ते। तथापि जयकृष्णमते कर्तृविहितस्याख्यातस्य कृतौ, एकत्वादिसंख्यायाम्, वर्तमानादिकाले च शक्तिः विद्यते इति निष्कर्षः।

**कर्तृविहिताख्यातस्य शाब्दबोधः —**

कर्तृविहितस्य तिङ्-प्रत्ययस्योदाहरणं हि 'चैत्रः तण्डुलं पचति' इति। तण्डुलम् इत्यत्र तण्डुलपदेन तण्डुलपदार्थोपस्थितिः। द्वितीयया विभक्त्या कर्मत्वरूपफलोपस्थितिः। तण्डुलरूपपदार्थस्य कर्मत्वरूप-अम्विभक्तौ वृत्तित्वसम्बन्धेन अन्वयः। वृत्तिः नाम का इति चेदुच्यते आधेयत्वम् इति। तेन तण्डुलमित्युक्ते तण्डुलवृत्तिकर्मत्वमिति। पच्-धातुना पाकोपस्थितिः। पाकः नाम कः इति चेदुच्यते विक्लित्त्यनुकूलव्यापारः। विक्लित्त्यनुकूलव्यापारः च अधिश्रयणादि-अधःश्रयणान्तपूर्वापरीभूतव्यापारकलापः। तादृशपाके अनुकूलतासम्बन्धेन तण्डुलवृत्तिकर्मत्वमन्वेति। तेन तण्डुलवृत्तिकर्मतानुकूलपाकः इति शाब्दबोधः। आख्यातेन कृत्युपस्थितिः जायते। एवञ्च कृतौ अनुकूलतासंसर्गेण तादृशपाकस्य अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलकृतिरित्यन्वयबोधः। पुनश्च चैत्रपदेन चैत्रपदोपस्थितिः। चैत्रे आश्रयतासम्बन्धेन तादृशकृतेः अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलकृत्याश्रयः चैत्रः इति शाब्दबोधः। अत्र कर्तृविहिताख्यातस्य कृतौ वर्तमानत्वादौ एकत्वादौ च शक्तिः सिद्धा। एकत्वादौ इत्यत्र आदिपदेन द्वित्वबहुत्वयोः ग्रहणम्। एवञ्च वर्तमानत्वादौ इत्युक्ते अतीतत्वभविष्यत्त्वयोः ग्रहणम्। अर्थात् कृतौ अवच्छेद्यत्वसम्बन्धेन वर्तमानत्वादिकम् अन्वेति। कर्तरि एकत्वादिकं समवायसम्बन्धेन अन्वेति। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलवर्तमानकालावच्छिन्नकृत्याश्रयाभिन्नैकत्ववान् चैत्रः इति शाब्दबोधः।

अपरञ्च वाक्यं हि 'चैत्रः घटमानयति' इति। घटपदेन घटपदार्थोपस्थितिः। द्वितीयया कर्मतोपस्थितिः। कर्मता च उत्तरदेशसंयोगरूपा। घटपदार्थस्य कर्मतायाम् अनुकूलत्वसम्बन्धेन अन्वयो भवति। तेन घटवृत्तिकर्मत्वमिति बोधः। आङ्-पूर्व-नीञ्-धातुना अभिमतदेशवृत्तिसंयोगानुकूलव्यापारजनकव्यापाररूपानयनोपस्थितिः जायते। तादृशकर्मतायाः अनुकूलत्वसम्बन्धेन आनयने अन्वयो भवति। तेन घटवृत्तिकर्मतानुकूलमानयनमिति बोधः। तत आख्यातेन कृत्युपस्थितिः जायते। तादृशानयनस्य अनुकूलत्वसम्बन्धेन कृतावन्वयो भवति। तेन घटवृत्तिकर्मतानुकूलानयनानुकूलकृतिः इति बोधः। ततश्चैत्रपदेन चैत्रपदार्थोपस्थितिः जायते। तादृशकृतिः आश्रयतासम्बन्धेन चैत्रे अन्वेति। तेन घटवृत्तिकर्मतानुकूलानयनानुकूलकृत्याश्रयः चैत्र इति बोधः।

## न्यायविरोधापत्तिः —

"एकपदोपात्तपदार्थयोः न विशेष्यविशेषणभावेनान्वयबोधः" इति कश्चित् प्रसिद्धः न्यायः। एवञ्च एकस्मात् पदात् उत्पन्नयोः पदार्थयोः कदापि विशेष्यविशेषणभावेन अन्वयबोधः न कार्यः। एवं सति एकस्मात् तिङ्-प्रत्ययात् उत्पन्नानां कृतिसंख्याकालादीनां विशेषणविशेष्यभावेनान्वयः कथम्। एवञ्च आख्यातार्थकृतौ आख्यातार्थकालः अवच्छेद्यत्वसम्बन्धेन विशेषणं भवति। प्रकृतन्यायविरुद्धमेतच्च। अत एव आख्यातार्थकृतौ आख्यातार्थकालादीनामन्वयस्तु न्यायविरुद्धत्वात् दोषाय परिकल्प्यते।

## समाधानम् —

एतच्च दोषाय न गण्यते। यतो हि एकपदोपात्तयोः पदार्थयोः एव विशेष्यविशेषणभावसम्बन्धेन अन्वयः भवति, इति नियमस्वीकारे तथा कापि राजाज्ञा न विलसति। एतेन एकपदोपात्तयोः पदार्थयोः विशेष्यविशेषणभावसम्बन्धेन अन्वयः भवत्येव। एकस्मात् तिङ्प्रत्ययात् कृतिः कालश्च उत्पद्यते। तेन आख्यातार्थकृतौ अवच्छेद्यत्वसम्बन्धेन आख्यातार्थवर्तमानकालः विशेषणं सम्भवति। एतेन न कोऽपि दोषः भवति। तथाहि प्रोक्तं शब्दार्थसारमञ्जरीनामकग्रन्थे— "एकपदोपात्तपदार्थयोर्न विशेषणविशेष्यभावेनान्वयबोधः इति व्युत्पत्तेरस्वीकारादननुभवाच्च"[9] इति।

आख्यातशब्दस्य सत्स्वपि नैकेषु अर्थेषु सारमञ्जर्याख्यग्रन्थे आख्यातशब्दः तिङ्दवाच्यः। स च आख्यातः त्रिविधः। तथाहि— क) कर्तृविहितः, ख) कर्मविहितः, ग) भावविहितश्च। कर्तृविहिततिङ् इत्युक्ते कर्तरि अर्थे विहितः तिङ्-प्रत्ययः। एवञ्च कर्मविहिततिङ् इत्युक्ते कर्मणि अर्थे विहितः तिङ्-प्रत्ययः। भावविहिततिङ् इत्युक्ते भावार्थे विहितः तिङ्-प्रत्ययः। पत्रे अस्मिन् केवलं कर्त्रर्थे विहितानां तिङाम् अर्थविवेचनं विहितम्। न्यायमते कर्तृविहिततिङां कृतौ शक्तिः। व्याकरणमते कर्तृविहिततिङां कर्तरि शक्तिः। न्यायवैयाकरणयोः मतवैपरीत्यं स्पष्टं प्रतीयते। एवञ्च कृतौ शक्तिस्वीकारे पाणिनीयस्मृतिविरोधापत्तिः, पुरुषव्यवस्थोच्छेदापत्तिः, अभिहितानभिहितव्यवस्थाभङ्गश्च भविष्यतीति वैयाकरणाः। परन्तु नैयायिकाः तथा न मन्यन्ते। ते तु पाणिनीयस्मृतिविरोधस्थले भावप्रधाननिर्देशं स्वीकृत्य दोषं निवारयति। एवञ्च पुरुषव्यवस्थोच्छेदापत्तिस्थले तिङर्थान्वितार्थबोधके तिङर्थसंख्यान्वयिवाचिनि वा युष्मदि उपपदे प्रयुज्यमाने अप्रयुज्यमाने च पुरुषव्यवस्था भवति। पुनश्च अभिहितानभिहितव्यवस्थास्थले कर्तृगतसंख्याभिधानानभिधानाभ्यां विभक्तिव्यवस्था विधीयते। अर्थात् वैयाकरणदर्शितदोषाणां समाधानं जयकृष्णशर्मणा सारमञ्जरीग्रन्थे प्रदर्शितम्। एवञ्च तिङां क्व शक्तिः इति स्थले नैयायिकाः मीमांसकाः वैयाकरणाश्च परस्परं विवदन्ते। स्वस्वशास्त्रानुसारं स्वमतमेव श्रेयः इति प्रतिभाति। लेखोयं छात्राणाम् उपकाराय भवेदिति शिवम्।

### Endnote

1. वैयाकरणसिद्धान्तकौमुदी— (पृष्ठासंख्या- ७७)।
2. वैयाकरणसिद्धान्तकौमुदी.– (पृष्ठासंख्या-८४)।
3. शब्दशक्तिप्रकाशिका– (पृष्ठासंख्या- ३११)।
4. शब्दार्थसारमञ्जरी.–(पृष्ठासंख्या- ६६)।
5. शब्दार्थसारमञ्जरी–(पृष्ठासंख्या-–६६)।
6. शब्दार्थसारमञ्जरी— (पृष्ठासंख्या-– ६६)।
7. सारमञ्जरी.(टीकासहिता)– (पृष्ठासंख्या-–५)।
8. शब्दार्थसारमञ्जरी— (पृष्ठासंख्या-.– ६६)।
9. शब्दार्थसारमञ्जरी— (पृष्ठासंख्या-– ६६)।

**Bibliography**


- Bhaṭṭa, N. (1977). *Vaiyākaraṇasiddhāntamañjūṣā* (K. P. Shukla, Ed.). Sampurnanand Sanskrit Vishvavidyalaya.
- Bhaṭṭa, N. (2008). *Paramalaghumanjūṣā (With Vaṃśī Commentary)*. Chowkhamba Vidya Bhawan.
- Bhaṭṭa, N. (2011). *Paramalaghumanjūṣā (With Bālabodhinī Hindi Commentary)* (J. Tripathi, Ed.). Chowkhamba Krishnadas Academy.
- Bhaṭṭa, Ś. K. (1947). *Śrīkauṇḍavaiyākaraṇabhūṣaṇasāraḥ (With Prabha-darpaṇa Commentary)*. Ādarśa Granthamālā.
- Bhaṭṭa, Ś. K. (1988). *Vaiyākaraṇabhūṣaṇasāraḥ (With Sāvitrī Commentary)* (A. Mishra, Ed.). Sampurnanand Sanskrit Vishvavidyalaya.
- Bhaṭṭa, Ś. K. (2013). *Vaiyākaraṇabhūṣaṇasāraḥ (With Subodhinī Commentary)* (C. P. Dwivedi, Ed.). Chowkhamba Sanskrit Pratishthan.
- Dīkṣita, Bh. (1961). *Vaiyākaraṇasiddhāntakaumudī (With Bālamanoramā and Tattvabodhinī Commentaries)* (G. Sharma & P. Sharma, Ed.). Motilal Banarsidass.
- Dīkṣita, Bh. (2016). *Vaiyākaraṇasiddhāntakaumudī (With Śrīdharamukhollāsinī Commentary)* (L. Sharma, Ed.). Chowkhamba Surbharati Prakashan.
- Patañjali. (2013). *Vyākaraṇa-Mahābhāṣyam (With Bhāvabodhinī Hindi Commentary)* (J. Tripathi, Ed.). Chowkhamba Krishnadas Academy.
- Patañjali. (2014). *Mahābhāṣyam (With Pradīpa and Uddyota Commentaries)* (B. Joshi, Ed.). Chowkhamba Sanskrit Pratishthan.
- Śarmā, J. (1997a). *Śabdārthasāramañjarī (With Hindi Commentary)* (R. C. Panda, Ed.). Kashi Hindu Vishvavidyalaya (BHU).
- Śarmā, J. (1997b). *Sāramañjarī (With Notes and Translation)* (R. Shastri, Ed.). The Ramakrishna Mission Institute of Culture.
- Śarmā, J. (2008). *Śabdārthasāramañjarī (With Sāradī Commentary)* (A. Bandyopadhyay, Ed.). Swadesh.


———